# shrIviShNustutiH brahmakRRitA

# શ્રીવિષ્ણુસ્તુતિઃ બ્રહ્મકૃતા

## Document Information

Text title : viShNustutiHbrahma

File name : viShNustutiHbrahma.itx

Category : vishhnu, vishnu

Location : doc_vishhnu

Proofread by : PSA Easwaran psawaswaran

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : April 12, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીવિષ્ણુસ્તુતિઃ બ્રહ્મકૃતા

જ્ઞાતોઽસિ મેઽદ્ય સુચિરાન્નનુ દેહભાજાં
ન જ્ઞાયતે ભગવતો ગતિરિત્યવદ્યમ્ ।
નાન્યત્ત્વદસ્તિ ભગવન્નપિ તન્ન શુદ્ધં
માયાગુણવ્યતિકરાદ્યદુરુર્વિભાસિ ॥ ૧॥

રૂપં યદેતદવબોધરસોદયેન
શશ્વન્નિવૃત્તતમસઃ સદનુગ્રહાય ।
આદૌ ગૃહીતમવતારશતૈકબીજં
યન્નાભિપદ્મભવનાદહમાવિરાસમ્ ॥ ૨॥

નાતઃ પરં પરમ યદ્ભવતઃ સ્વરૂપં
આનન્દમાત્રમવિકલ્પમવિદ્ધવર્ચઃ ।
પશ્યામિ વિશ્વસૃજમેકમવિશ્વમાત્મન્
ભૂતેન્દ્રિયાત્મકમદસ્ત ઉપાશ્રિતોઽસ્મિ ॥ ૩॥

તદ્વા ઇદં ભુવનમઙ્ગલ મઙ્ગલાય
ધ્યાને સ્મ નો દર્શિતં ત ઉપાસકાનામ્ ।
તસ્મૈ નમો ભગવતેઽનુવિધેમ તુભ્યં
યોઽનાદૃતો નરકભાગ્ભિરસત્પસઙ્ગૈઃ ॥ ૪॥

યે તુ ત્વદીયચરણામ્બુજકોશગન્ધં
જિઘ્રન્તિ કર્ણવિવરૈઃ શ્રુતિવાતનીતમ્ ।
ભક્ત્યા ગૃહીતચરણઃ પરયા ચ તેષાં
નાપૈષિ નાથ હૃદયામ્બુરુહાત્ સ્વપુંસામ્ ॥ ૫॥

તાવદ્ભયં દ્રવિણગેહસુહૃન્નિમિત્તં
શોકઃ સ્પૃહા પરિભવો વિપુલશ્ચ લોભઃ ।
તાવન્મમેત્યસદવગ્રહ આર્તિમૂલં
યાવન્ન તેઽઙ્ઘ્રિમભયં પ્રવૃણીત લોકઃ ॥ ૬॥

દૈવેન તે હતધિયો ભવતઃ પ્રસઙ્ગાત્
સવાશુભોપશમનાદ્વિમુખેન્દ્રિયા યે ।
કુર્વન્તિ કામસુખલેશલવાય દીનાઃ
લોભાભિભૂતમનસોઽકુશલાનિ શશ્વત્ ॥ ૭॥

ક્ષુત્તૃટ્ત્રિધાતુભિરિમા ગ્રરર્ધમાનાઃ
શીતોષ્ણવાતવર્ષૈરિતરેતરાચ્ચ ।
કામાગ્નિનાઽચ્યુત રુષા ચ સુદુર્ભરેણ
સમ્પશ્યતો મન ઉરુક્રમ સીદતે મે ॥ ૮॥

યાવત્પૃથક્ત્વમિદમાત્મન ઇન્દ્રિયાર્થ-
માયાબલં ભગવતો જન ઈશ પશ્યેત્ ।
તાવન્ન સંસૃતિરસૌ પ્રતિસઙ્ક્રમેત
વ્યર્થાપિ દુઃરવનિવહં વહતી ક્રિયાર્થા ॥ ૯॥

અહ્ન્યાપૃતાર્તકરણા નિશિ નિઃશયાના
નાનામનોરથધિયા ક્ષણભગ્નનિદ્રાઃ ।
દૈવાહતાથર્રચના ત્રદષયોઽપિ દેવ
યુષ્મત્પ્રસઙ્ગવિમુખા ઇહ સંસરન્તિ ॥ ૧૦॥

ત્વં ભાવયોગપરિભાવિતહૃત્સરોજઃ
આસ્સે શ્રુતેક્ષિતપથો નનુ નાથ પુંસામ્ ।
યદ્યદ્ધિયા ત ઉરુગાય વિભાવયન્તિ
તત્તદ્વપુઃ પ્રણયસે સદનુગ્રહાય ॥ ૧૧॥

નાતિપ્રસીદતિ તથોપચિતોપચારૈઃ
આરાધિતઃ સુરગણૈર્હૃદિ બદ્ધકામૈઃ ।
યત્સર્વભૂતદયયાઽસદલભ્યયૈકો
નાનાજનેષ્વવહિતઃ સુહૃદન્તરાત્મા ॥ ૧૨॥

પુંસામતો વિવિધકર્મભિરધ્વરાદ્યૈઃ
દાનેન ચોગ્રતપસા વ્રતચર્યયા ચ ।
આરાધનં ભગવતસ્તવ સત્ક્રિયાર્થો
ધર્મોઽર્પિતઃ કર્હિચિદ્ધ્રિયતે ન યત્ર ॥ ૧૩॥

શશ્વત્સ્વરૂપમહસૈવ નિપીતભેદ-

મોહાય બોધધિષણાય નમઃ પરસ્મૈ ।
વિશ્વોદ્ભવસ્થિતિલયેષુ નિમિત્તલીલા-
રાસાય તે નમ ઇદં ચકૃમેશ્વરાય ॥ ૧૪॥

યસ્યાવતારગુણકર્મવિડમ્બનાનિ
નામાનિ યેઽસુવિગમે વિવશા ગૃણન્તિ ।
તેનૈકજન્મશમલં સહસૈવ હિત્વા
સયાન્ત્યપાવૃતમૃતં તમજં પ્રપદ્યે ॥ ૧૫॥

યો વા અહં ચ ગિરિશશ્ચ વિભુઃ સ્વયં ચ
સ્થિત્યુદ્ભવપ્રલયહેતવ આત્મમૂલમ્ ।
ભિત્ત્વા ત્રિપાદ્વવૃધ એક ઉરુપ્રરોહઃ
તસ્મૈ નમો ભગવતે ભુવનદ્રુમાય ॥ ૧૬॥

લોકો વિકર્મનિરતઃ કુશલે પ્રમત્તઃ
કર્મણ્યયં ત્વદુદિતે ભવદર્ચને સ્વે ।
યસ્તાવદસ્ય બલવાનિહ જીવિતાશાં
સદ્યશ્છિનત્ત્યનિમિષાય નમોઽસ્તુ તસ્મૈ ॥ ૧૭॥

યસ્માદ્બિભેમ્યહમપિ દ્વિપરાર્ધધિષ્ણ્ય-
મધ્યાસિતઃ સકલલોકનમસ્કૃતં યત્ ।
તેપે તપો બહુસવોઽવરુરુત્સમાનઃ
તસ્મૈ નમો ભગવતેઽધિમખાય તુભ્યમ્ ॥ ૧૮॥

તિર્યઙ્મનુષ્યવિબુધાદિષુ જીવયોનિ-
ષ્વાત્મેચ્છયાઽઽત્મકૃતસેતુપરીપ્સયા યઃ ।
રેમે નિરસ્તરતિરપ્યવરુદ્ધદેહઃ
તસ્મૈ નમો ભગવતે પુરુષોત્તમાય ॥ ૧૯॥

યોઽવિદ્યયાઽનુપહતોઽપિ દશાર્ધવૃત્ત્યા
નિદ્રામુવાહ જઠરીકૃતલોકયાત્રઃ ।
અન્તર્જલેઽહિકશિપુસ્પર્શાનુકૂલાં
ભીમોર્મિમાલિનિ જનસ્ય સુખં વિવૃણ્વન્ ॥ ૨૦॥

યન્નાભિપદ્મભવનાદહમાસમીડ્ય
લોકત્રયોપકરણો યદનુગ્રહેણ ।
તસ્મૈ નમસ્ત ઉદરસ્થભવાય યોગ-

નિદ્રાવસાનવિકસન્નલિનેક્ષણાય ॥ ૨૧॥

સોઽયં સમસ્તજગતાં સુહૃદેક આત્મા
સત્ત્વેન યન્મૃડયતે ભગવાન્ભગેન ।
તેનૈવ મે દૃશમનુસ્પૃશતાદ્યથાહં
સ્રક્ષ્યામિ પૂર્વવદિદં પ્રણતપ્રિયોઽસૌ ॥ ૨૨॥

એષ પ્રપન્નવરદો રમયાઽઽત્મશક્ત્યા
યદ્યત્કરિષ્યતિ ગૃહીતગુણાવતારઃ ।
તસ્મિન્ સ્વવિક્રમમિદં સૃજતોઽપિ ચેતો
યુઞ્જીત કર્મશમલં ચ યથા વિજહ્યામ્ ॥ ૨૩॥

નાભિહ્રદાદિહ સતોઽમ્ભસિ યસ્ય પુંસો
વિજ્ઞાનશક્તિરહમાસમનન્તશક્તેઃ ।
રૂપં વિચિત્રમિદમસ્ય વિવૃણ્વતો મે
મા રીરિષીષ્ટ નિગમસ્ય ગિરાં વિસર્ગઃ ॥ ૨૪॥

સોઽસાવદભ્રકરુણો ભગવાન્ વિવૃદ્ધ-
પ્રેમસ્મિતેન નયનામ્બુરુહં વિજૃમ્ભન્ ।
ઉત્થાય વિશ્વવિજયાય ચ નો વિષાદં
માધ્વ્યા ગિરાઽપનયતાત્ પુરુષઃ પુરાણઃ ॥ ૨૫॥

ઇતિ શ્રીમદ્ભાગવતાન્તર્ગતા બ્રહ્મકૃતા શ્રીવિષ્ણુસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

*shrIviShNustutiH brahmakRRitA*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*